प्रथमा दीक्षा : सम्भाषणम्

## कुटुम्बजनाः

लोट्,- सम्बोधनपिरथमा

माता - राधे । पुनीत । शीघ्रम् उत्तिष्ठतामा ।

राधा - आम्ब । किमर्थं शीघ्रम् ? अद्य रविवासरः खलु ?

माता - शीघ्रं दन्तधावनं कुरुताम् । स्नानमपि समापयताम् । अद्य जनकस्य जन्मदिनम् ।

पुनीतः - अम्ब । कः उपाहारः ?

माता - अद्य उपाहारः अनन्तरम् । प्रथमं सर्वं देवालयं गच्छाम ।

पुनीतः - अम्ब उष्णं जलं सज्जीकरोतु । अहं स्नानं करोमि ।

पिता - नलिनि । क्षीरार्थं पात्रम् आनयतु । शीघ्रं काफी करोतु ।

माता - भो वार्तापत्रिकाम् अनन्तरं पठतु । शीघ्रं सिद्धः भवतु ।

राधा - अम्ब । महती बुभुक्षा क्षीरं ददातु ।

माता - वत्से । क्षीरं स्वीकुरु । तदनन्तरं नूतनवस्त्रं धर ।

पुनीतः - अम्ब । ममापि नूतनवस्त्रं ददातु ।

पिता - नलिनि । पूजार्थं स्वीकरोतु । गच्छाम वा ?

माता - पुनीत । राधे । द्वौ अपि देवं मनस्कुरुताम् । भोः । आगच्छतु । आवां तत्र गच्छाव ।

राधा - तात । घण्टा उपरि अस्ति । अहं कथं वादयामि ?

पुनीतः - किञ्चित् कूर्दनं कुरु ।

माता - पुनीत । त्वं चेष्टां मा कुरु । सा रोदिति ।

पिता - भोः अर्चक । एकाम् अर्चनां करोतु ।

माता - भवान् एव प्रसादं स्वीकरोतु ।

पिता - पूजा समाप्ता । आगच्छन्तु गच्छाम ।